# 2021

## SANSKRIT — HONOURS

**Paper : DSE-2**

**(KĀVYA)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section – A**

**Unit – I**

**(Marks : 20)**

1. अधोलिखिनेषु यथेच्छ***मेकस्य*** उत्तरं संस्कृतभाषया देवनागरीलिप्या च लेख्यम्।

(a) विश्वनाथनिरूपितं काव्यलक्षणं लिखित्वा सोदाहरणं व्याख्यायताम्। 2+8

(b) मम्मटनिरूपिते काव्यलक्षणे प्रयुक्तस्य 'सगुणौ' इति पदस्य अनावश्यकता विश्वनाथमतमनुसृत्य विचार्यताम्। 10

(c) "चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि। काव्यादेव"— उक्तेरस्याः अभिप्रायः पर्यालोच्यताम्। 10

2. अधोलिखितेषु ***विषयद्वय***मवलम्ब्य संस्कृतभाषया देवनागरीलिप्या च टीका कार्या। 5×2

(a) वक्रोक्तिजीवितकारः।

(b) दोषाः।

(c) प्रहेलिका।

(d) गुणाः।

**Unit – II**

**(Marks : 25)**

3. अधोलिखितेषु यथाभिमत***मेकस्य*** उत्तरं संस्कृतभाषया देवनागरीलिप्या च लेख्यम्।

(a) विश्वनाथसम्मतं पदलक्षणं लिखित्वा प्रतिपदव्यावृत्तिप्रदर्शनपूर्वकं विचार्यताम्। 2+8

(b) विश्वनाथमतानुसारेण लक्षणायाः स्वरूपं सोदाहरणं व्याख्याय लक्षणलक्षणायाः स्वरूपमपि सोदाहरणं विचार्यताम्। 5+5

(c) विश्वनाथसम्मतं व्यञ्जनास्वरूपं व्याख्याय लक्षणामूलयाया व्यञ्जनायाः स्वरूपं सोदाहरणं विचार्यताम्। 5+5

**4.** अधोलिखितेषु कस्यचि***देकस्य*** संस्कृतभाषया देवनागरीलिप्या च व्याख्या करणीया। 7×1

(a) इत्थं वाक्यं द्विधा मतम्।

(b) संकेतो गृह्यते जातौ गुणद्रव्यक्रियासु च।

(c) तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।

**5.** अधोलिखितेषु ***द्वयोः*** टीका संस्कृतभाषया देवनागरीलिप्या च लेखनीया। 4×2

(a) अभिधा।

(b) आकाङ्क्षा।

(c) उपादानलक्षणा।

(d) योग्यता।

**Unit – III**

**(Marks : 20)**

**6.** अधोलिखितेषु ***षट् प्रश्नाः*** संक्षेपेण पूर्णवाक्येन च संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। 2×6

(a) स्थायिभावः कदा रसतामेति?

(b) नायकलक्षणं किम्?

(c) "लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः"— अत्र विश्वनाथस्य मते चमत्कारस्य कः पर्यायशब्दः?

(d) कः सत्त्वगुणः?

(e) करूणादौ रसे परं सुखं जायत इत्यस्मिन् विषये किं प्रमाणम्?

(f) काव्यतः सर्वेषां रसास्वादः कथं न भवति?

(g) कथं साधारणीकृति-नामकः व्यापारः स्वीकरणीयः?

(h) विश्वनाथस्य मते व्यभिचारिभावस्य लक्षणं किम्?

(i) व्यभिचारिभावाः कतिविधाः?

**7.** अधोलिखितेषु कस्य***चिदेकस्य*** संस्कृतभाषया देवनागरीलिप्या च व्याख्या कार्या। 8×1

(a) विलक्षण एवायं कृतिज्ञप्तिभेदेभ्यः स्वादनाख्यः कश्चिद्व्यापारः।

(b) रसोद्बोधे विभावाद्याः कारणान्येव ते मताः।

(c) रत्याधुद्बोधका लोके विभावाः काव्यनाट्ययोः।

---